International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 330-333
© 2019 IJSR
www.anantaajournal.com
Received: 06-05-2019
Accepted: 08-06-2019

**Pankaj Kumar Mahana**
Ph.D. Scholar in Sanskrit
North Orissa University
Baripada, Odisha, India

**Correspondence**
**Pankaj Kumar Mahana**
Ph.D. Scholar in Sanskrit
North Orissa University
Baripada, Odisha, India

# प्राचीनभारतीयसंस्कृतौ नारीणाम् अधिकारः

**Pankaj Kumar Mahana**

**प्रस्तावना**

भारतीयसंस्कृतिः सर्वप्राचीना भवति। वैदिककालादारभ्य एतावत्पर्यन्तं सर्वेऽपि मनुष्याः अस्यां संस्कृतावेव जीवितुमिच्छन्ति । तथा सततं सुखमवापतुं प्रयतन्ते। परन्तु तेषां मनुष्याणां परस्परं व्यवहार-चिन्तनादिषु ते दुःखेन भवन्ति। समाजेऽस्मिन् नारीणां कृते स्वतन्त्राधिकारो वर्तते जीवितुम् । अर्थात् भगवान् मनुः मनुस्मृतौ वदति

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः"। तदर्थमेव भारतीयसमाजे तासां नारीणां स्वतन्त्ररूपेण स्थितिर्भवेत्। नारीणां यत्र सम्मानं नैव भवति तत्र देवानामपि वासो नैव भवतीति मनुस्मृतिः वदति। तेन तासां कृते विशेषाधिकारो भवेत्।

नृ (मनुष्यः) इति शब्देन स्त्रीत्वविवक्षायां ङीन् प्रत्यये नारीति पदस्य निष्पत्तिर्जायते । यस्यार्थो भवति मानुषी स्त्री । स्त्रीशब्दः व्यपको भवति । नारी शब्दस्तु व्याप्यः । व्याप्यव्यापकेन सम्बन्धेन स्त्रीशब्दः नारीशब्दस्य पर्यायो भवति । उक्तं यथा अमरकोशे –

> स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
> प्रतीपदर्शिनी वामा वनिता महिला तथा ।। [1] (अ.को 2.6.2)

## शोधपत्रस्य उद्देश्यम्

शोधपत्रेऽस्मिन् नारीणाम् अधिकारविषये चर्चा कृता । अर्थात् प्राचीनकाले नारीणां कीदृशाधिकार आसीत् । नार्यः कथं जीवन्ति स्म । तासाः स्थितिः कथमासीत् । तासां कृते समाजे सम्मानं कथामासीत् । एतत् सर्वमपि अत्र शोधपत्रे विचारितम् । भगवान् मनुः मनुस्मृतौ नारीणां परिस्थितिः तथा च तासां अवस्थाविषये यदुक्तं तदत्र किञ्चित् विचारितम् । यतो हि मानवाधिकारे नारीणामपि कुत्र कुत्र कथम् अधिकारो भवतीति विषयं कैश्चित् विचारकैः कविभिश्च स्वीयस्वीयकाव्येषु विचारितम् ।

## मानवाधिकारस्य तात्पर्यम्

मानवाधिकारोऽयं शब्दः आङ्गलभाषया Human Rights इति क्रियते । अर्थात् मानवावां कुत्र अधिकारो भवति । यथा शिक्षाक्षेत्रे मानवानां कथम् अधिकारः । भोजने, निवासे जीवने, राजनीतिक्षेत्रे, चिन्तने एतेषु तथा अन्यषु बहुषु कथं मानवाः स्युरिति मानवाधिकारस्य विषयो भवति । अस्माकं भरते सर्वे मनुष्याः स्वीयस्वीयपरिस्थित्यनुसारं स्वतन्त्रेण जीवितुं शक्नुवन्ति ।

तदेव मानवाधिकारस्यापि क्वचित् विषयो भवति । स्वातन्त्र्यभारतेऽस्मिन् सर्वेषामपि सर्वत्र अधिकारोऽस्ति । सैवाधिकारः मानवाधिकारः।

**प्राचीनभारतीयसंस्कृतौ नारीणाम् अधिकारः**

वैदिककालात् आरभ्य अस्माकं भारतीयसमाजे नारीणामुपरि विशेषध्यानं दत्तं वर्तते। यद्यपि वेदेषु नारीणां कृते स्वतन्त्ररूपेण सम्मानमासीत् तथापि भगवान् मनुः तदुपरि नारीणां सम्मानम् अधिकारश्च विषये उक्तवान् । तथाहि –

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।। [2]
(मनु. 3.56)

प्रसङ्गेस्मिन् साक्षात् द्रष्टुं शक्यते यत् अस्माकं भारते इदानीं किं नारीणाम् अयम् अधिकारो वर्तते वा। अर्थात् नारीणां कृते किं तथा सम्मानम् दानीं भवति । तर्हि यदि नास्ति तर्हि अत्र विचारणीयांशः मनोः वाक्यम् । तत्र नारीणां अधिकारविषयं कथं सूचितं भवति।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन । इति मनुवचनम्। अर्थात् गृहे स्त्रियः श्रियश्च तथा भेदो नास्तीति। तथा सा स्त्री गृहे लक्ष्मीरिव भवति । अनया उक्त्या स्त्री तथा श्रीः मध्ये भेदो नास्ति। सन्तानपालनं, तस्य परिपोषणं प्रतिदिनम् समागतानाम् अतिथीनां पूजनम् एतत् सर्वमपि कर्म स्त्रीणां भवति । अत्र स्त्रीमाम् अधिकारो प्राचीनकाले कथम् आसीदिति द्रष्टुं शक्यते । तेन इदानीन्तनकालेऽपि तासां सैवाधिकारो भवति । एतस्मिन् अधिकारे कथमपि ताः विच्युताः नैव भवेयुः। उक्तं यथा

उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रत्यहं लाकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ।। [3]
(मनु. 9.27)

भगवतः मनोः कथनस्यानुसारं यस्य कुलस्य कृते स्त्रियः मनसि दुःखं विधाय अथवा क्रन्दनं विधाय अभिशापं ददाति तस्य कुलस्य शीघ्रमेव विनाशं भवति। तथा यत्र स्त्री सुखेन भवति तत्कुलस्य विनाशः कदापि नैव भवति । तदर्थमेव स्त्रीणाम् अधिकारोऽयं सम्प्रति भवेत् यत् तासां कृते कदापि केनापि दुःखं नैव दद्यात्। अथवा क्रन्दनं कर्तुम् अवसरो वा। प्रसङ्गेऽस्मिन् उक्तं यथा –

शोचन्ति जामयो यत्र विनशत्यशु तत्कुलम् ।
न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ।। [4]
मनु. 3. 57

एतस्य विषयस्योपरि चिन्तनं विधाय भगवान् मनुः उक्तवान् यत् तेनैव कारणेन यः मनुष्यः सदा उन्नतिमिच्छति स्वस्य तदा सत्कारः तथा यज्ञोपदितादिषु उत्सवेषु तासां स्त्रीणां कृते भोजनं, वस्त्रं,भूषणञ्च जत्वा विशेषरूपेण आदरसत्कारं कुर्यात् । स्त्रीणाम् अयमेव विशेषाधिकारो इदानीमपि भवति अस्माकं भारतीयसमाजे। परन्तु क्वचित् तस्य परिपालनमपि नैव कुर्वन्ति जनाः। उक्तं यथा –

तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सताकरेषूत्सवेषु च ।। [5]
(मनु. 3.59)

**स्त्रीणाम् वेदाध्ययनस्याधिकारः**

वैदिकवाङ्मयस्य अनुशीलनेन ज्ञायते यत् प्राचीनकाले शिक्षायारूपरि सर्वेषाम् अधिकारो आसीत्। ऋग्वेदे पुत्र इव पुत्री अपि शिक्षायाम् अधिकारः समानरूपेण प्राप्नोति स्म । तदत्र इदानीम् आधुनिककालेऽपि मानवाधिकारे स्त्रीणां शिक्षायाम् अधिकरूपेण बलं ददाति भारतीयसर्वकारः । तैत्तिरीयस्य उपाख्याने प्रमाणितं यत् कन्याः धार्मिकशिक्षायाम् अभिरूचिमुत्पादयति स्म । बृहदारण्यकोपनिषदि शिक्षायां विदुषीपुत्रीणाम् आकांक्षा अभिव्यक्ता। उक्तं यथा –
अथ य इच्छेद् दुहिता मे पण्डिता जायेत सर्वमायुरियादिति कन्यातिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै।

मन्त्रद्रष्टाऋषीणाम् इव घोषा, विश्ववारा, अपाला, लोपामुद्रादयः स्त्रिय अपि शिक्षायाः क्षेत्रे स्वबुद्धिं प्रदर्शितवत्यः । एतदिदानीं कथं भवेदिति चिन्तनीयम् अस्माभिः ।

### स्त्रीणाम् स्वातन्त्र्यम् अधिकारश्च

वेदकालीनसमाजे कन्याः स्त्रियश्च गृहे बन्धनं कृत्वा नैव स्थाप्यते स्म। ताः उन्मुक्तवातावरणे तिष्ठन्ति स्म । साजसज्जया विवाहेषु लोकोत्सवेषु गच्छन्ति स्म स्त्रियः । भगवान् वसिष्ठः "अस्वतन्त्रता स्त्री पुरुषप्रधाना " एवञ्च अभिधाय नारीणाम् अस्वातन्त्र्यं निरूपयामास।मनुरपि तथैव । सामान्यरूपेण तासां स्वातन्त्र्यं न दत्वा उक्तं –

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
रक्षन्ति स्थाविरे पुत्राः न स्त्री स्वतन्त्र्यमर्हति ।। [6]
मनु 9.3

परन्तु प्रसङ्गेऽस्मिन् विचारयितुं शक्यते यत् किं प्रकृतरूपेण इदानीम् आधुनिककाले स्त्रीणाम् इदृशी अवस्था भवेत् । तासां किं स्वातन्त्र्यं कदापि नैव भवेत् । तदर्थमेव प्राचीनभारतीयसंस्कृतेः उपरि विचारः कर्तव्यः ।परन्तु एतस्याः अवस्थायाः यथा तथा प्रकारेण बहुभिः स्मृतिकारैः स्वीकृतम् ।

मनुस्मृतौ त्रिंशत् वर्षीयाणां पुरुषाणां कृते द्वादशवर्षीयायाः पुत्र्याः विवाहस्यापि अधिकार आसीत् । उक्तं यथा –

त्रिंशद्वर्षोद्वहेत्कन्या हृद्यां द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षा वा धर्मे सीदति सत्वरः ।। [7]
मनु.9.94

ऋग्वेदे दम्पतीशब्दस्य प्रयोगः प्रायः पतिपत्न्योः कृते द्विवने प्रयुक्तः । अतः पत्नी स्वपत्या सह गृहस्य स्वामिनी इत्युच्यते। परन्तु पत्न्याः स्वपतितः पृथक् रूपेण गृहसम्पत्तौ अधिकारः नासीत्। मनोः कथनानुसारं पुत्रः स्वात्मा इव भवति, एवं पुत्री तं पुत्रम् इव समानं भवति। अतः आत्मासमं पुत्र्याः जीविते सति मृतपितुः धनं को वा अन्यः कथं स्वीकर्तुं प्रभवति । अत्रापि नारीणाम् अधिकारविषयः सुस्पष्टं परिलक्षितुं शक्यते । प्रसङ्गेऽस्मिन् उक्तं यथा –

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा ।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् ।। [8]
मनु.9.130

एवञ्चात्र पुत्र्याः धनाधिकारविषये मनुस्मृतौ निर्दिष्टं वर्तते । भगवान् मनुः मनुस्मृतौ स्त्रीणां धनाधिकारविषयेऽपि तच्छास्त्रे निरूपयामास। स्त्रियः षट्सु स्थानेषु धनस्याधिकारविषयेऽपि चर्चा कृता। तत्र धनस्य षड्स्थानानि यथा –

| | |
|---|---|
| 1. अध्याग्निः | 4.भातृदत्तम् |
| 2. अध्यावाहनिकः | 5. मातृदत्तम् |
| 3. प्रीतिदत्तम् | 6. पितृदत्तम् |

एवञ्च संस्कृतवाङमये वेद-रामायण-महाभारत-उपनिषद्-स्मृतिग्रन्थेषु च सर्वत्र स्त्रीणाम् अधिकारविषये निरूपितं वर्तते ।

### उपसंहारः

संस्कृतवाङमये सर्वत्र मानवस्य अधिकारविषयः सुचर्चितो भवति। मानवाधिकारो नाम मानवानां कुत्र कुत्र स्वकर्मानुसारं फलं प्राप्तुं वा तथा साधारणरूपेणाधिकारो वा भवति । तदुपरि विशेषरूपेण ध्यानम् अस्माभिः दातव्यमेव। शोधशीर्षकेऽस्मिन् स्त्रीणां अधिकारविशेषरूपेण कथं भवति तदालोचितम् । मनुस्मृतौ तु मनुना कथम् स्त्रीणामधिकारः चर्चितः तदत्र किञ्चित् स्थालीपूलकन्यायेन विचारितम् ।

**पादटिप्पणी**

१. अ.को.२.६.२
२. म. स्मृ. - ३.५६
३. म. स्मृ. - ९.२७
४. म. स्मृ. - ३.५७
५. म. स्मृ. - ३.५९
६. म. स्मृ. - ९.३

७. म. स्मृ. - ९.९४

८. म. स्मृ. - ९.१३०

**सहायक ग्रन्थसूची**


१. मनुस्मृतिः चौखम्वा संस्कृत सिरीज, वाराणासी

२. यज्ञवल्क्यस्मृतिः चौखम्वा संस्कृत सिरीज, वाराणासी

३. धर्मशास्त्रइतिहासः चौखम्वा संस्कृत सिरीज, वाराणासी

४. गौतमधर्मसूत्र-चौखम्वा संस्कृत संस्थान

५. धर्मशास्त्रमानविकमूल्यवोधश्च-स्नातकोत्तर - धर्मशास्त्रविभागः श्रीजगन्नाथसंस्कृतविश्वबिद्यालय पुरी

६. अधुनिकहिन्दुविधो-प्रफेसर किशोरचन्द्रमहापात्र ।